**II PUC MODEL QUESTION PAPER FOR REDUCED SYLLABUS 2021-22**

Time:-3 1/4 Hrs SUB:-Sanskrit(09) Max Marks:-100

**I.एकवाक्येन संस्कृतभाषया उत्तरं लिखत।(दशानामेव) 10*1=10**

1. भारतवर्षे कति कुलपर्वताः सन्ति?

2.विश्वस्य मातरः काः?

3.विक्रमादित्यकथां का कथयति?

4.राजा किमाश्रित्य रात्रौ स्थितः?

5.प्रव्राजकः वणिजः गृहं किमर्थम् अगच्छत्?

6.राजपुत्रः मञ्जूषायाः अन्तः कं निक्षिपति?

7.शारद्वतः कः?

8.राणाप्रतापः कस्मिन् ग्रामे अजायत?

9.बालिकायाः हस्तात् रोटिकाम् आकृष्य कः अधावत्?

10.महाश्वेतायाः पिता कः?

11.महाश्वेता किम् अजिघ्रत्?

12.सुन्दरः किमर्थं नगरम् आगच्छति?

13.सुन्दरः कियत्पर्यन्तं पठितवान्?

14.के धनमिच्छन्ति?

15.अर्थान् कथं चिन्तयेत्?

**II.द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत। (पञ्चानामेव) 5*2=10**

16.पञ्चद्वीपानां नामानि लिखत।

17.विक्रमादित्यः राक्षसं किम् उपदिशति?

18.प्रव्राजकः निजान् अनुचरान् किम् उवाच?

19.राजपुत्रः मञ्जूषां प्राप्य किं करोति?

20.बिल्लाः राणाप्रतापं कथं साहाय्यम् अकुर्वन्?

21.कीदृशं कुसुमगन्धम् अजिघ्रम् इति महाश्वेता वदति?

22.शान्तिः किमर्थं तरुणं द्रष्टुम् आगतवती?

23.कोषः किमर्थं संरक्ष्यः?

**III.पाठनाम उल्लिख्य श्लोकानाम् अनुवादं कन्नडभाषया आङ्ग्लभाषया वा कुरुत।(त्रयाणामेव) 3*3=9**

24.भारतस्यास्य वर्षस्य नवभेदान्निबोधत।
समुद्रान्तरिता ज्ञेयास्तेत्वगम्याः परस्परम्॥

25.तदेतां वीक्ष्य दुःखं मे जातं भक्तो हि मे भवान्।
तेनैवमुक्तवानस्मि त्यक्त्वा मौनं भवत्कृते॥

26.मञ्जूषां तां च गङ्गायां तथैवोर्ध्वस्थदीपिकाम्।
कृत्वा तत्याज निक्षिप्य घोरं वानरमन्तरे॥

27. अतः परीक्ष्य कर्तव्यं विशेषात्सङ्गतं रहः।
अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम्॥

28.मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये।
दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांशुलः॥

29.मनसा चिन्तितं कार्यं वाचा नैव प्रकाशयेत्।
मन्त्रवत् रक्षयेत् गूढं कार्ये चापि नियोजयेत्॥

**IV.पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत।(चतुर्णामेव) 4*2=8**

30.त्वं विश्वस्य आर्तिं परिहरसि।

31.सुखानि ते भर्तृकुलदेवताः वितरन्तु।

32.अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम्।

33.कुत्रापि गत्वा धनं संग्रहिष्यामि।

34.मम जीवनं सार्थकं भवेत्।

35.पुण्डरीक इति नाम चक्रे।

36.किं माम् अन्यथा सम्भावयसि।

V. **दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत।(पञ्चानामेव) 5*5=25**

37.पुराणेषु भारतं कथं वर्णितम्?

38.विक्रमादित्यस्य परोपकारगुणं वर्णयत।

39.प्रव्राजकः।

40.अङ्गुलीयकप्रसङ्गः।

41.दुष्यन्तस्य पात्रचित्रणम्।

42.महाराणाप्रतापेन अनुभूता कष्टपरम्परा।

43. पुंडरीकस्य जन्मवृत्तान्तं लिखत।

44.सा शान्तिः।

VI.**मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत।** **4*1=4**

45.सर्वः सगन्धेषु --------।

46.राणाप्रतापः ------- सभाम् आकारितवान्।

47.सिंहवञ्च ------ ।

48.विद्या---- रक्ष्यते।

| पराक्रमेत्, गण्यानाम्, योगेन, विश्वसिति |
|---|

VII. 49.संयोजयत"। **4*1=4**

| अ | आ |
|---|---|
| ´प्रजापतिः | ज्ञानमवाप्नोति |
| जावन्ता बाई | ब्रह्मचर्यस्य |
| अलङ्कारमिव | प्रतापस्य माता |
| श्रुत्वा | ब्रह्मा |

VIII.रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत।(त्रयाणामेव) **3*1=3**

50.परदुःखेन <u>साधवो</u>ऽत्यन्तदुःखिनो भवन्ति।

51.अनुचराः <u>प्रव्राजकस्य</u> वचनम् अपालयन्।

52.ऋषयः <u>प्रसन्नमुखवर्णाः</u> दृश्यन्ते।

53.<u>उदयसिंहः</u> प्रतापी राजा आसीत्।

54.<u>उद्योगाः</u> अस्मत्प्रतीक्षायां न तिष्ठन्ति।

**IX.यथानिर्देशं लिखत।(चतुर्णामेव)** **4*3=12**

55. सन्धिं विभजत/योजयत(त्रयाणामेव)

खल्वन्यत्र , अर्थविद्राजा , अधः+तूष्णीम् , सर्वे+अपि , मकरकेतुः+उत्पादितः

**56.विग्रहवाक्यं/समस्तपदं लिखत (त्रयाणामेव)**

देशान्तरम् , अनुद्धताः , अभिज्ञायते अनेन इति , गुरोः उपदेशः,मात्रा सदृशी

**57.लिङ्ग-विभक्ति – वचनानि लिखत(द्वयोरेव)**

प्रजानाम् **,** कौतुकात् , अम्बया , मह्यम् ,

**58.लकार-पुरुष-वचनानि लिखत (द्वयोरेव)**

भवेत् , अपनेष्यामि , अपश्यम् , मन्यते

**59.पदपरिचयं कुरुत।(त्रयाणामेव)**

निर्गतः , निन्दन्ती , भूत्वा , स्नातुम् , हृष्टः

**60.** प्रयोगं परिवर्तयत।

त्वं मौनं त्यक्त्वा उक्तवान्

अथवा

विधिना दर्शितं प्रभुत्वम्

**61.अलङ्कारं सलक्षणं निर्दिशत ।**

तमभ्यधावत् स्वकृतो मूर्तिमानिव दुर्नयः।

अथवा

मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम्।

62. **कन्नडभाषया आङ्ग्लभाषया वा अनुवदत।** **(एकम्)** **1*5=5**

पुरा केरले शिवगुरु-आर्याम्बा दम्पत्योः एकः पुत्रः अजायत। भगवतः शिवस्य अनुग्रहात् जातस्य तस्य शङ्कर इति नाम कृतम्।सः बाल्ये एव वेदाध्ययनं समाप्य, सन्यासं स्व्यकरोत्। मातुः आज्ञया नर्मदातीरं गत्वा गुरोः सकाशे शास्त्राणि अधीतवान्। अनन्तरं भारतस्य चतुर्षु दिक्षु मठं संस्थाप्य सनातनधर्मस्य गरिमानम् अवर्धयत। स एव श्री शङ्करभगवत्पादः।

अथवा

क्रीडा मानवस्य नितराम् आवश्यकी।क्रीडया शक्तिः वर्धते। उल्लासः उत्पद्यते।आरोग्यं जायते। मनः विकसति। जीवनोत्साहः एधते। एकताभावः सम्पद्यते। मैत्री विस्तारं गच्छति, अतः खलु ज्येष्ठाः एकघण्टापर्यन्तं तुल्यशीलवयोभिः कीडितव्यमिति उपदिशन्ति।

63. **संस्कृतभाषया अनुवदत।(एकम्)** **1*5=5**

ತಾರಕಾಸುರನನ್ನು ಸಂಹರಿಸಿದ ಕಾರ್ತಿಕೇಯನು ಶಿವನ ಕಿರಿಯ ಮಗ.ವಿಘ್ನನಿವಾರಕನಾದ ಗಣೇಶನು ಹಿರಿಯಮಗ,ಸಂಪತ್ತಿಗೆ ಅಧಿಪತಿಯಾದ ಕುಬೇರನು ಪರಮಮಿತ್ರ.ಜಗನ್ಮಾತೆಯಾದ ಪಾರ್ವತಿಯು ಅವನ ಹೆಂಡತಿ.ಮಾವನು ಪರ್ವತರಾಜ.ಅವನ ವಾಹನವು ನಂದಿ.ಅವನ ಸೇನಾಪ್ರಮುಖನು ವೀರಭದ್ರ.ಇಂತಹ ಕುಟುಂಬವನ್ನು ಹೊಂದಿದ್ದರೂ ಪರಶಿವನು ಭಿಕ್ಷಾಟನೆಯನ್ನು ಮಾಡುತ್ತಾನೆ.ಎಂತಹ ವಿಧಿವಿಪರ್ಯಾಸ!

Karthikeya the destroyer of demon Taraka. is the younger son of Lord Shiva. Ganesha the recover of the obstacles is the his elder son. Kubera the lord of wealth is his friend. Parvathi the mother of universe is his wife.Parvatharaja the king of mountains is his father-in-law.Nandhi is his vehicle. Veerabhadra is his chief of army.In spite of all this,Lord Shiva begs.what a destiny.

अथवा

ಒಮ್ಮೆ ರಾಜರ್ಷಿಯಾದ ಜನಕಮಹಾರಾಜನ ಬಳಿ ಋಷಿಗಳು ಬಂದು ಪ್ರಶ್ನಿಸಿದರು.-‘ಹೇ ರಾಜನ್, ಪ್ರಜಾಪಾಲನೆ ಹಾಗೂ ಯೋಗಸಾಧನೆಗಳನ್ನು ಏಕಕಾಲದಲ್ಲಿ ಹೇಗೆ ಮಾಡುತ್ತೀಯೆ?’ ಎಂದು.ಆಗ ಜನಕನು ‘ಎಲೈ ಋಷಿವರ್ಯರೇ , ನೀವು ಸ್ವತಃ ತಿಳಿದಿದ್ದರೂ,ನನ್ನನ್ನು ಪರೀಕ್ಷಿಸಲು ಪ್ರಶ್ನಿಸುತ್ತಿರುವಿರಿ ಎಂದು ಭಾವಿಸುತ್ತೇನೆ. ಈ ಪ್ರಪಂಚದಲ್ಲಿ ಎಲ್ಲವೂ ಪರಮೇಶ್ವರನ ಅನುಗ್ರಹದಿಂದ ನಡೆಯುತ್ತದೆ, ನನ್ನದು ಏನೂ ಇಲ್ಲ ಎಂಬ ಭಾವನೆಯಿಂದ ಕರ್ತವ್ಯವನ್ನು ನಿರ್ವಹಿಸುತ್ತೇನೆ .ಹಾಗಾಗಿ ಇದು ಸಾಧ್ಯ’ ಎಂದು ಉತ್ತರಿಸಿದನು.

Once the sages went to the king Janaka and asked him-‘oh king,how can you perform both protection of the subjects and accomplishing Yoga simultaneously?’.The king replied –‘Oh great sages,I think, you are questioning me ,though you yourselves know it. Every thing happens in this world by the grace of Almighty. I dishcharge my duties with the feeling that nothing is mine. So this is possible.

64.**इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।** **5*1=5**

पुरा अयोध्यायां सगरो नाम राजा आसीत्। एकदा स:अश्वमेधयागं कर्तुम् ऐच्छत्। तदर्थं स: यज्ञाश्वं अमुञ्चत।इमं विषयं ज्ञात्वा इन्द्र: यज्ञाश्वं अपहृतवान्। तं पातालं नीत्वा तत्र तप:कुर्वत: कपिलमुने: समीपे स्थापितवान् । यज्ञाश्वं अन्विष्यन्त:सगरपुत्रा: भूमिं खनन्त:पातालं अगच्छन्। तत्र यज्ञाश्वं दृष्टवा,कपिल एव चोर इति मत्वा ,ते तं महामुनिम् अवाच्यशब्दै: अनिन्दन् । तदा कुपितो मुनि: नेत्रे उन्मील्य तान् सर्वान् भस्मीकृतवान्। अत: ज्येष्ठा: वदन्ति ‘अविचार्य किमपि कर्म न करणीयम्’इति ।

प्रश्नाः -

i. 1.सगरो नाम राजा कुत्र आसीत्?
ii. 2.राजा सगर: किं कर्तुं ऐच्छत् ?
iii. 3.सगरस्य यज्ञाश्वं क: अपहृतवान् ?
iv. 4.कुपितो मुनि: किं अकरोत् ?
v. 5.अत: ज्येष्ठा: किं वदन्ति ?

अथवा

युष्माकं विद्यालयस्य वार्षिकोत्सवार्थं आगन्तुं मित्राय पत्रमेकं लिखत ।